कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 721 विषय वैदिक
नाव. उत्सर्जनोपाकर्म प्रयोग mss
लेखक/लिपीकार बाळंभट्ट रामडोहळकर
पृष्ठ 15 काळ सन. 1817 पूर्ण/अपूर्ण

अघ्राण्यानां

आदौ निर्विघ्नतासिध्यर्थं गणपतिपूजनं च करिष्ये ॥३

उ॰ जं॰ १

एकोश्रीम्ह पैः॥

॥श्रीगणेशायनमः॥ अथोत्सर्जनप्रयोगः॥ स्कमुखश्च्रेत्यादि ॥ देशकालौ स्मृत्वा॥ मम एतेषां ब्राह्मणानां चाधीतानां छंदआदीनां यातयामतानिरासेनाप्यायनद्वारा श्रीपरमेश्वरप्रीत्यर्थं उत्सर्जनाख्यं कर्म करिष्ये॥ इति संकल्प्य॥ उत्सर्जनहोमं कर्तुं स्थंडिलादि करिष्ये॥ स्थंडिलं॥ गोमयेन प्रदक्षिणमुपलिप्य॥ उल्लिख्य षडुलेखाः॥ त्रा कल्लमाग्नेयां निरस्य॥ अपउपस्पृश्य॥ जुष्टो दमूना आत्रेयो वसुश्रुतोग्निस्त्रिष्टुप्॥ एह्यग्न इरा कुरणो गौतमोग्निस्त्रिष्टुप्॥ अग्न्यावाहने॰॥ ॐ जुष्टो॰ ॐ एह्यग्न॰॥ इत्यक्षतैरावाह्य॥ आच्छादनं दूरीकृत्य॥ समस्तव्याहृतीनां परमेष्ठी प्रजापतिः प्रजापतिर्बृहती॥ अग्निप्रतिष्ठापने वि॰॥ ॐ भूर्भुवः स्वरों अमुकनामानमग्निं प्रतिष्ठापयामि॥ प्रोक्षितेंधनानि निक्षिप्य॥ वेणुधमन्या प्रबोध्य ध्यायेद

उद्गायतां प आत प्रागा पतनानां तु मोस्तीस्त्री मध्येतमयु क्ष्म.

राम १

क्षैंत्रिये

वं॥ चत्वारिश्रृंगेति वामदेवोग्निस्त्रिष्टुप्॥ अग्निमूर्तिध्याने वि॰॥ ध्यानं॥ क्रियमाणे उत्सर्जनहोमे देवतापरिग्रहार्थं अन्वाधानं करिष्ये॥ अस्मिंनन्वाहितेग्नो जातवेदसमग्निमिध्मेन प्रजापतिं प्रजापतिं चाघारदेवते आज्येन अग्नीषोमौ चक्षुषी आज्येनात्र प्रधानं॥ सावित्रिं१ ब्रह्माणं२ श्रद्धां३ मेधां४ प्रज्ञां५ धारणां६ सदसस्पतिं७ अनुमतिं८ छंदांस्यृषीन्९ एताः प्रधानदेवताः आज्यद्रव्येण पुनरत्र प्रधानं॥ अग्निं१ अमृण स्सूर्यान्२ अग्निं३ त्राकुंतं४ अग्निं५ मित्रावरुणौ६ अग्निं७ अपः८ अग्निं९ मरुतः१० अग्निं११ विश्वान्देवान्१२ अग्निं१३ इंद्रासोमौ१४ इंद्रं१५ अग्नामरुतः१६ पवमानसोमं१७ सोमं१८ अग्निं१९ संज्ञानं२० ॥ एताः प्रधानदेवताग्रहसिद्धान्नचरुद्रव्येण॥ शेषेण स्विष्टकृतमग्निमिध्मसंनहनेन रुद्रं अयासमग्निं देवान्विष्णुं अग्निं वायुं सूर्यं प्रजा

विश्वान्देवान्स्सिस्त्रावेणा २ दृव्येण निर

उ०जं०
२

पतिं एताः प्रायश्चित्तदेवताः आज्येन ज्ञाताज्ञातदोषनिबर्हणार्थं त्रिवारं अग्निं ३ मरु
तश्चाज्येन अंगदेवताः प्रधानदेवताः सर्वाः संहिताः संतु एवं सांगेन कर्मणा सद्यो
यक्ष्ये॥ समस्तव्याहृतीनां परमेष्ठी प्रजापतिः प्रजापतिर्बृहती॥ अन्वाँन समिद्धो
मेवि०॥ ॐ भूर्भुवस्वस्वाहा॥ प्रजापतयइदं॥ इध्माबर्हिषोश्च संनहनं॥ परिसमूह
नं ३॥ परिस्तरणं ३॥ दक्षिणतो ब्रह्मासनं॥ उत्तरतः पात्रासादनार्थं॥ कोश्चिदुत्तरतो
दर्भानास्तीर्य॥ पर्युक्षणं ३॥ चरुस्थाली १ प्रोक्षण्यो २ दर्वि ३ स्रुक् वौ ४ प्रणीता ५ आ
ज्यपात्रे ६ इध्मा ७ बर्हिषी ८ शूर्प ९ कृष्णाजिनं १० उलूखलं ११ मुसलं [illegible] पवि
त्रे कृत्वा॥ प्रोक्षणीपात्रमुत्तानं कृत्वा॥ तत्रानंतर्गर्भितं साग्रसमस्थूलप्रादेशमा

गोयां
धा
राम
२

रूपेपवित्रे

त्रे कुशाद्वयं निधाय॥ शुद्धाभिरद्भिस्तत्पात्रं पूरयित्वा॥ गंधादि प्रक्षिप्य॥ हस्तयो
रंगुष्ठोपकनिष्ठिकाभ्यामुदगग्रे पृथक्पवित्रे धृत्वा॥ त्रिरुत्पूय॥ पात्राण्यु
त्तानानि कृत्वा॥ इध्मं च विस्रस्य॥ सर्वाणि पात्राणि त्रिः प्रोक्षयेत्॥ ता आपः किंचि
त्कमंडलो क्षिपेदित्यके॥ अन्यैर्दर्भैराच्छादयेत्॥ ते पवित्रे प्रणीतापात्रे निधाय॥
प्रणीतापात्रमग्नेः प्रत्यङ्निधाय॥ उत्पूताभिरद्भिः पूरयित्वा॥ गंधाक्षतपु
ष्पादि क्षिपत्वा॥ अस्मिन्कर्मणि ब्रह्मत्वेन त्वामहं वृणे॥ कृताकृतः॥ यजमानस्त
त्प्रणीतापात्रं दक्षिणोत्तराभ्यां पाणिभ्यां मुखसममुद्धृत्योत्तरतोग्नेर्दर्भेषु
निधाय पवित्रे गृहीत्वान्यैर्दर्भैराच्छादयेत्॥ ते पवित्रे आज्यपात्रे निधायैतत्पा
त्रं पुरतः संस्थाप्य तस्मिन्नाज्यमासिच्योग्नेरुत्तरतः स्थितांगारान्भस्मनास

वामहस्ते दर्भाग्रद्वयं धृत्वा

मुखसममुद्धृ
त्योग्नेः प्रणाय

अन्यैर्दर्भै
राच्छादयेत

उ०जं०
३

हाग्नेरुदकपरिस्तरणाद्बहिर्निरूह्य तेषु आज्यपात्रे मधिश्रित्य ज्वलता दर्भोल्मु
केनावज्वल्यांगुष्ठपर्वमात्रे प्रक्षालितं दर्भाग्नि द्वयमाज्ये प्रक्षिप्य पुनर्ज्वलता
तेनैव दर्भोल्मुकेन चरुणा सहाज्यं त्रिः पर्यग्नि कृत्वा तदुल्मुकमपास्यापस्पृ
ष्ट्वाज्यपात्रं भुवि कर्षन्निवोदगुद्वास्यांगारानग्नौ प्रत्यस्यापस्पृष्ट्वा तत्र स्थापये
वाज्यं॥ सवितुष्ट्वा हिरण्यस्तूपः सविता पुर उष्णिक्॥ आज्यस्योत्पवने वि०॥
ॐ सवितुष्ट्वा प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिरि
ति प्रागुत्पुनाति सकृन्मंत्रेण द्विस्तूष्णीं॥ ते पवित्रे अद्भिः प्रोक्ष्याग्नौ प्रहरेत्॥
स्कंदाय स्वाहा॥ स्कंदायेदं॥ प्रोक्षितायां भुवि बर्हिरास्तरणं॥ तदुपरि आज्य
स्थापनं॥ स्रुक्स्रुवयोः संमार्जनं॥ दक्षिणेन हस्तेन स्रुक्स्रुवौ गृहीत्वा

राम
३

सव्येन कांश्चिद्दर्भानादाय सहैवाग्नौ प्रताप्य दर्वीं निधाय॥ स्रुवस्य बिलम
ग्नैस्तु पृष्ठमभ्यात्ममग्रतः॥ आरभ्य पृष्ठतो यावदुपरि स्थाद्बिलं भवेत्॥ कुशा
नामूलतो दंडमेकैकं त्रिर्मृजेत वै प्रोक्ष्य प्रताप्य॥ घृतादुत्तरतः स्थापयेत्॥ तथै
व स्रुचि॥ संमार्गदर्भानभ्युक्ष्याग्नौ प्रहरेत्॥ श्रृतं च रुं स्रुवगृहीतेनाज्येना
भिघार्य उदगुद्वास्य अग्न्याज्ययोर्मध्येन नीत्वाज्याद्दक्षिणतो बर्हिषि सांतर
मासाद्य पुनरभिघार्य॥ बर्हिः पृथक्करणार्थं पात्रांतरं चर्वाज्ययोर्मध्ये निधा
यैकादशांगुलिमिते देशेग्नौ गंधाक्षतपुष्पैरग्निं समंत्रमर्चयेत्॥ विश्वानि नदुरि
ति स्त्रणामात्रेयो वस्कश्रुतोग्निस्त्रिष्टुप्॥ ह्वाध्यामर्चने स्योपस्थाने वि०॥ ॐ
विश्वानि नो०३॥ आत्मानं चालंकृत्य॥ हस्तं प्रक्षाल्य॥ दर्भाबंधनरज्जुमिध्मा

अग्नीमलं
कृत्य

उ०जं०
४

पृथक

स्थानेनिधाय॥ पाणिनेध्ममादाय मूलमध्याग्रेषु स्रुवेणत्रिरभिघार्य॥ मूलमध्ययो
र्मध्यभागेगृहीत्वा॥ अयंतेवामदेवोजातवेदा अग्निस्त्रिष्टुप्॥ इध्महवने वि०॥ ओं
अयंतइध्म आत्माजातवेदस्तेनेध्यस्ववर्द्धस्व चेद्धवर्धयचास्मान्प्रजयापशुभिर्ब्र
ह्मवर्चसेनान्नाद्येन समेधयस्वाहा॥ अग्नयेजातवेदस इदं०॥ वायव्यदिशिमारभ्याग्ने
यीपर्यंतंप्रजापतिंमनसास्मरन्स्वाहेत्युक्त्वाघार्यतथैवनैर्ऋतींदिशिमारभ्येशानीपर्यं
तंनैरंतर्येणाज्यधारामिध्मदारुपरिकृत्वा॥ प्रजापतयइदं०॥ इत्याघारौ॥ उत्तरे॥
अग्नयेस्वाहा॥ दक्षिणे सोमायस्वाहा॥ सोमायेदं०॥ इत्याज्यभागौ॥ सांगतासिध्य
र्थंसर्वप्रायश्चित्तंकरिष्ये॥ ओं भूर्भुवःस्वःस्वाहा॥ प्रजापतयइदं०॥ ओं सावित्र्यैस्वाहा॥ सा राम
वित्र्याइदंनममेतित्यागः॥ ओं ब्रह्मणेस्वाहा॥ ब्रह्मणइदं०॥ ओं श्रद्धायैस्वाहा॥ श्रद्धायाइदं०॥ ६
अग्नयइदं०॥ ३

पश्चा

ओं मेधायैस्वाहा॥ मेधायाइदं०॥ ओं प्रज्ञायैस्वाहा॥ प्रज्ञायाइदं०॥ ओं धारणायैस्वाहा॥ धार
णायाइदं०॥ ओं सदसस्पतयेस्वाहा॥ सदसस्पतयइदं०॥ ओं अनुमतयेस्वाहा॥ अनुमतय०॥
ओं छंदोभ्यऋषिभ्यःस्वाहा॥ छंदोभ्यऋषिभ्यइदं०॥ पंचावर्त्तीतु॥ प्रस्तोभस्तमितिमा
र्यनोकृत्वा॥ अवदानधर्मेणचरुमवदाय॥ दर्व्यामुपस्तीर्य॥ मध्यात्पूर्वार्धात्॥ हविः
श्री. अवत्तंच॥ अग्निमीळेमधुच्छंदाग्निर्गायत्री॥ उत्सर्जनप्रधानगृहसिद्धान्नहोमेवि
नियोगः॥ ओं अग्निमीळेपुरोहितंऋक्॥ अग्नयइदं०॥ १॥ कुशुंभकस्तदगस्त्यापृण
सूर्याअनुष्टुप्॥ उत्स०॥ कुशुंभकस्तदब्रवीतऋक्॥ अमृणसूर्यायइदं०॥ २॥ त्वमग्नेशौनको
गृत्समदोग्निर्जगती॥ उत्स०॥ त्वमग्नेद्युभिस्त्वमाशुशुक्षणिः॥ ऋक् [illegible] अग्न
यइदं०॥ ३॥ आवदंस्त्वंगृत्समदःशकुंतोजगती॥ उत्स०॥ ओं आवदंस्त्वंशकुनेभद्रमावद॥
त्वं०शौनकोगृ०

भार्गवो

ऊर्जं० ऋक्॥आकूतायै दं०॥४॥सोमस्य मा गाथिनो विश्वामित्रोग्निस्त्रिष्टुप्॥उत्स०॥सोमस्य
५ मा तवसं वक्ष्यग्ने ऋक्॥अग्नय इदं०॥५॥गृणानो जमदग्निर्मित्रावरुणौ गायत्री॥उ
त्स०॥गृणा ना जमदग्निना ऋक्॥मित्रावरुणाभ्यामिदं०॥६॥त्वां ह्यग्ने वामदेवोग्नि गोतमो
रुष्णी॥उत्स०॥त्वां ह्यग्ने सदमित्समन्यवो ऋक्॥अग्नय इदं०॥७॥धामं ते वामदेव आ गो०
पो जगती॥उत्स०॥धामं ते विश्वं भुवनमधिश्रितं ऋक्॥अद्भ्य इदं०॥८॥अबोध्य
रात्रेयो ग्निर्बुधगविष्ठिरावग्निस्त्रिष्टुप्॥उत्स०॥अबोध्यग्निः समिधा जनानां ऋक्॥अग्न
आत्रेय य इदं०॥९॥गंतानः एवयामरुन्मरुतो जगती॥उत्स०॥गंता नो यज्ञं यज्ञियाः सुशमि
बार्हस्पत्यो ऋक्॥मरुद्भ्य इदं०॥१०॥त्वं ह्यग्ने भरद्वाजोग्निस्त्रिष्टुप्॥उत्स०॥त्वं ह्यग्ने प्रथमो म
थमो मनोता ऋक्॥अग्नय इदं०॥११॥यो नः स्वः पायुर्भरद्वाजो देवब्रह्माण्यनुष्टुप्॥

लि

उत्स०॥यो नः स्वो अरणो ऋक्॥विश्वेभ्यो देवेभ्य इदं०॥१२॥अग्निं नरो वसिष्ठोग्निर्वि मैत्रावरुणि
राट्॥उत्स०॥अग्निं नरो दीधितिभिररण्यो ऋक्॥अग्नय इदं०॥१३॥प्रति चक्ष्व मैत्रावरुणि
र्वसिष्ठ इंद्रासोमावनुष्टुप्॥उत्स०॥प्रति चक्ष्व वि चक्ष्वे ऋक्॥इंद्रासोमाभ्यामिदं०॥
काण्वः १४॥मा चिदन्यत्प्रगाथ इंद्रो बृहती॥उत्स०॥मा चिदन्यद्वि शंसत ऋक्॥ इंद्राय इदं०॥१५॥
काण्वः आग्ने याहि सोभरिरग्निर्मरुतोनुष्टुप्॥उत्स०॥आग्ने याहि मरुत्सखा ऋक्॥अग्ना
वैश्वामित्रो मरुद्भ्य इदं०॥१६॥स्वादिष्ठया मधुच्छंदाः पवमानसोमो गायत्री॥उत्स०॥स्वादिष्ठया म
दिष्ठया ऋक्॥पवमानसोमाय इदं०॥यत्ते राजन्मारीचः कश्यपः सोमः पंक्तिः॥उत्स०॥
यत्ते राजञ्छृतं हविः ऋक्॥सोमाय इदं०॥१८॥अग्ने बृहन्नात्रेयस्त्रितोग्निस्त्रिष्टुप्॥उत्स०॥
अग्ने बृहन्नुषसामूर्ध्वो अस्थात ऋक्॥अग्नय इदं०॥१९॥समानी वः संवननः संज्ञान

उ०जं०
८

मनुष्टुप्॥उत्स०॥समानीवआकूतिः ऋक्॥संज्ञानायेदं०॥२०॥दर्व्यामुपस्तीर्य॥उत्त
राद्धात्स्रुक्त्वौ स्विष्टकृतं॥स्विष्टकृतं हूरभिघारयति॥यदस्येति हिरण्यगर्भोग्निर
तिधृतिः॥स्विष्टकृद्धोमे विनियोगः॥ॐ यदस्य कर्मणोत्यरीरिचं यद्वान्यून
मिहाकरं॥अग्निष्टत्स्विष्टकृद्विद्वान्सर्वं स्विष्टं सुहुतं करोतु मे॥अग्नये स्विष्टकृते
सुहुतहुते सर्वप्रायश्चित्ताहुतीनां कामानां समर्द्धयित्रे सर्वान्नः कामान्समर्द्धय स्वा
हा॥अग्नये स्विष्टकृत इदं०॥इतीशानदेशे जुहुयात्॥त्रिसंध्यानं विस्रस्य॥रुद्राय
पशुपतये स्वाहा॥रुद्राय पशुपतय इदं०॥अप उपस्पृश्य॥सर्वैसिह प्राणायामं कृत्वा॥
पृथिवीत्यस्य मंत्रस्य मेरुपृष्ठ ऋषिः कूर्मो देवता सुतलं छंदः॥आसने विनियोगः॥पृथ्वि
त्वया धृता लोका देवि त्वं विष्णुना धृता॥त्वं च धारय मां देवि पवित्रं कुरु चासनं॥

राम
८

अपसर्पंतु ये भूता ये भूता भूमिसंस्थिताः॥ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया॥अप
क्रामंतु भूतानि पिशाचाः सर्वतो दिशं॥सर्वेषामविरोधेन ब्रह्मकर्म समारभेत्॥तरावे
जकं कुर्यात्॥ध्यायतज्जलमभिमंत्र्योपस्थे कृते दर्भगर्भं ब्रह्मांजलिं निधाय प्रणवादि
स्वयमुच्चारयेत्॥अन्यानप्येवमेवोपविष्टान्वाचयेत्॥प्रणवस्य परब्रह्म ऋषिः॥परमा
त्मा देवता॥दैवी गायत्री छंदः॥व्याहृतीनां जमदग्निर्भरद्वाजभृगवऋषयः॥अग्निर्वायुः
सूर्यो देवताः॥दैवी गायत्री दैवुष्णिक् दैवी बृहत्यश्छंदांसि॥गायत्र्या गाथिनो विश्वामित्रः स
विता गायत्री॥अग्निमीळ इत्यादीनां छंदसां मधुच्छंदादय ऋषयः॥अग्न्यादयो देवताः॥
गायत्र्यादीनि छंदांसि॥सर्वेषामुत्सर्जने विनियोगः॥पश्चोर्द्धर्चेत्रा सर्वां गायत्री वाचयि
त्वा॥अग्निमीळ इति नवर्चं सूक्तं॥अग्निर्वै देवानामवमो विष्णुः परमः॥अथ महाव्रतं॥

वीद्युदसीवी घमिपाप्मान मृताःसत्यम् सैमी

वैश्वामित्रोम धुच्छंदादय ऋषयः

४ इदंजनाउपश्रुत। अयाश्चेतीवीमहोयाज्ञ
ग्निःपंक्तीप्राः ७

उ॰जं॰
७

एषपंथाएतत्कर्म॥अथातःसंहितायाउपनिषत॥विदामघवन्विदा॥महाव्रतस्यपंचविंश
तिंसामिधेन्यः॥इषेत्वोर्जेत्वा॥अग्नआयाहिवीतये॥शंनोदेवीरभिष्टये॥अथत्रिक्षांप्र
वक्ष्यामि॥अथैतस्यसमाम्नायस्य॥वृद्धिरादैच्॥गौः॥ग्मा॥समाम्नायःसमाम्नातः॥
मयरसतजभनलगसंमितं॥पंचसंवत्सरमयं॥योगीश्वरं याज्ञवल्क्यं॥नारायणं
नमस्कृत्य॥अथातोधर्मंव्याख्यास्यामः॥अथातोधर्मजिज्ञासा॥अथातोब्रह्मजिज्ञा
सा॥तच्छंयोरावृणीमहे॥नमोब्रह्मणइतित्रिवदेत्॥प्रणवाद्येतदंतानन्यानपिवाचयेत॥
ततःसर्वेउत्कृष्टावेवदारेत्कक्काजलंस्पृशेयुः॥ततआचार्यैर्यायाश्चाग्नेस्यनमित्रा
स्तीश्चसत्यमित्वमयाअसि॥अयासावयसाकृतोयासन्हव्यमूहिषेयानोधेहिभेषजंस्वा
हा॥अग्नयेअयसइदं॥ॐअतोदेवाअवंतुनोयतः॥स्वाहादेवेभ्यइदं॥ॐइदंवि॰

१ अतोदेवामेधातीथीर्देवागायत्री प्रा॰ ॥१इदंवीष्णुर्मेधातीथीर्देवागा
यत्रीप्रा॰

ॐ शांतीः
शांतिःशां
तीः

राम
७

अनाज्ञातमीतीमंत्रस्यहीण्यगर्भोग्निरत्रीष्टुप
ज्ञाताज्ञातदोषनीर्बर्हणार्थंप्रायश्चीत्ते॰

यसाकन्त्रेसापूत्यस्त्रीतोग्निरत्रीष्टुप
ज्ञाताज्ञातदोषनीर्बर्हणार्थेप्रा॰

विष्णवइदं॥१॥ॐभूःस्वाहा॥अग्नय॰॥ॐभुवःस्वाहा॥वायव॰॥ॐस्वःस्वाहा॥सूर्याय॰॥
ॐभूर्भुवःस्वःस्वाहा॥प्रजापतय॰॥ॐअनाज्ञातंयदाज्ञातंयज्ञस्यक्रियतेमिथु॥अग्नेत
दस्यकल्पयत्वंहिवेत्थयथातथंस्वाहा॥अग्नय॰॥ॐपुरुषसंमितोयज्ञोयज्ञःपु
रुषसंमितः॥अग्नेत॰स्वाहा॥अग्नय॰॥ॐयत्पाकत्रामनसादीनदक्षानयज्ञस्यमन्वते
मर्त्तासः॥अग्निष्टद्धोताक्रतुविद्विजानन्यजिष्ठोदेवांऋतुशोयजातिस्वाहा॥अग्न
य॰॥ॐयद्वोदेवाअतिपातयानिवाचाचप्रयुतीदेवहेडनं॥अरायोअस्माँअभिदु
छुनायतेन्यत्रास्मीन्मरुतस्तंनिधेतनस्वाहा॥मरुद्भ्यइदं॥सांगतासिध्यर्थंसर्वं
प्रायश्चित्तंकरिष्ये॥ॐभूर्भुवःस्वःस्वाहा॥प्रजापतयइदं॥बर्हिषिपूर्णपात्रंनिनये
त॥ॐपूर्णमसिपूर्णमेभूयाःसुपूर्णमसिसुपूर्णमेभूयाःसदसिसन्मेभूयाःस

यद्वोदेवाअभीतपामरुतस्त्रीष्टुप्मंत्रतंत्र
कर्मवीपर्यासादीनीमीत्तकप्रायश्चीताज्य॰

उ०र्जे०
८

र्वमसिसर्वमेभूयाः अक्षितिरसिमामेक्षेष्ठाः॥ प्राच्यां दिशि देवा ऋत्विजो मार्जयंतां॥१॥
दक्षिणस्यां दिशि मासाः पितरो मार्जयंतां॥२॥ अपउपस्पृश्य॥ प्रतीच्यां दिशि गृहाः
पशवो मार्जयंतां॥३॥ उदीच्यां दिश्याप ओषध्यो वनस्पतयो मार्जयंतां॥४॥ ऊ
र्ध्वायां दिशि यज्ञः संवत्सरः प्रजापतिर्मार्जयंतां॥५॥ ॐ आपो अस्मान्मातरः शुंध
यंतु घृतेन नो घृतप्वः पुनंतु॥ विश्वं हि रिप्रं प्रवहंति देवी रुदिदाभ्यः शुचिरापूतए
मि॥ ॐ इदमापः प्रवहत० उतानृतं॥ सुमित्र्या न आप ओषधयः संतु॥ इत्यंतैः
शिरसि मार्जयेत॥ दुर्मित्र्यास्तस्मै संतु यो स्मान्द्वेष्टि यं च वयं द्विष्मस्तं हन्मि॥ इति नि
र्ऋतिदेशे कुशाग्रेरपः सिंचेत॥ ॐ माहं प्रजां परासिचं या नः सयावरी स्थन॥ समु
द्रे वो निनयानि स्वं पाथो अपीथ॥ परिस्तरणान्युत्तरे विसृजेत॥ परिसमूहनादि

राम
८

अग्न्यलंकरणं॥ उपस्थानं॥ अग्निपूजनं मानस्तोके०॥ कृतस्य०॥ यस्य स्मृत्या०॥ ॥
उदकतीरं गत्वा शरीरशुध्यर्थं उत्सर्जनांगत्वेन सर्वैः सह गणस्नानमहं करिष्ये॥ स्नात्वा
चम्य देशकालौ स्मृत्वा उत्सर्जनांगत्वेन भस्मस्नानमहं करिष्ये॥ ईशानाय नम इति
शिरसि॥ तत्पुरुषाय नम इति मुखे॥ अघोराय नम इति हृदये॥ वामदेवाय नम इ
ति गुह्ये॥ सद्योजाताय नम इति पादयोः॥ प्रणवेन सर्वांगे॥ अग्निरिति भस्म॥ वायु
रिति भस्म॥ जलमिति भस्म॥ स्थलमिति भस्म॥ व्योमेति भस्म॥ सर्वं ह वा इदं भ
स्म॥ मानस्तोके इति मंत्रेण सर्वांगं विलिप्य॥ स्नात्वाचम्य॥ गोमयस्नानं करिष्ये॥ गं
धद्वारामित्यादाय॥ अग्रमग्रं चरंतीनामोषधीनां वने वने॥ तासामृषभपत्नी
नां पवित्रं कायशोधनं॥ यन्मे रोगांश्च शोकांश्च नुद गोमय सर्वदा॥ शिरः प्रभृत्यं

उ०क०
२

गानिविलिप्य॥स्नात्वाचम्यउत्सर्जनांगत्वेनमृत्तिकास्नानमहं०॥बल्हिथापर्वता
नांखिदंबिभर्षिपृथिवी॥प्रयाभूमिंप्रवत्वतिमह्नाजिनोषिमहिनि॥भूमिंप्रा
र्थ्यं॥मावोरिषत्खनितायस्मैचाहंखनामिवः॥द्विपच्चतुष्पदस्माकंसर्वमस्त्व
नातुरं॥खनित्वा॥स्योनापृथिविभवान्नृक्षरानिवेशनी॥यच्छानःशर्मसप्रथः॥
मृदमादाय॥आयनेतिपरायणेदूर्वारोहंतुपुष्पिणीः॥ह्रदाश्चपुंडरीकाणिस
मुद्रस्यगृहाइमे॥दूर्वामादाय॥गायत्र्यासदूर्वामृदमभ्यक्ष्य॥भूमौनिधाय॥त्रा
तारमिंद्रमवितारमिंद्रंहवेहवेसुहवंशूरमिंद्रं॥ह्वयामिशक्रंपुरुहूतमिंद्रंस्वस्ति
नोमघवाधात्विंद्रः॥पूर्वस्यांमृत्क्षेपणेविं०॥यमायसोमंसुनुतयमायजुहुताहविः॥
यमंहयज्ञोगच्छत्यग्निदूतोअरंकृतः॥दक्षिणस्यांमृत०॥तत्वायामिब्रह्मणावंदमा

राम
२

नस्तदाशास्तेयजमानोहविर्भिः॥अहेळमानोवरुणेहबोध्युरुशंसमानआयुःप्रमोषीः॥
पश्चिमायांमृत०॥वयंसोमव्रतेतवमनस्तनूषुबिभ्रतः॥प्रजावंतःसचेमहि॥उत्तर
स्यांमृत०॥तत्सूर्यंरोदसीउभेदोषावस्तोरुपब्रुवे॥भोजेष्वस्मांअभ्युच्चरासदा॥उपरि
ष्टान्मृत०॥अध्वनश्चयस्वमोपरिसंतरांपादकौहर॥मातेकश्चपूकोदशन्मंत्रीहिब्रह्माब
भूविथ॥अधस्तान्मृत०॥इतिमृदंक्षिप्त्वाअंगेषुलिपेत्॥सहस्रशीर्षेतित्रिःशिरसि॥
अक्षीभ्यांतेनासिकाभ्यांकर्णाभ्यांकर्णाभ्यांछुबुकादधि॥यक्ष्मंशीर्षण्यंम
स्तिष्काज्जिह्वायाविवृहामिते॥मुखे॥ग्रीवाभ्यस्तउष्णिहाभ्यःकीकसाभ्योअनू
क्यात्॥यक्ष्मंदोषण्य१मंसाभ्यांबाहुभ्यांविवृहामिते॥कंठे॥आंत्रेभ्यस्तेगुदाभ्यो
वनिष्ठोर्हृदयादधि॥यक्ष्मंमतस्नाभ्यांयक्नःप्लाशिभ्योविं०॥हृदये॥नाभ्यानाभि

उ०क०
१०

न्नश्राददेचक्षुश्चित्सूर्येसचा॥कवेरपत्यमादुहे॥नाभौ॥त्वमिंद्रसजोषसमर्कंवि
भर्षिबाह्वोः॥वज्रंत्रिशानश्रोजसा॥बाह्वोः॥सोमानंस्वरणंकृणुहिब्रह्मणस्प
ते॥कक्षीवंतंयश्रौशिजः॥कक्षयोः॥यःकुक्षिःसोमपातमःसमुद्रइवपिन्वते॥
उर्वीरापोनकाकुदः॥कुक्ष्योः॥बह्वीनांपितावकुरस्यपुत्रश्चिश्चाकृणोतिसमना
वगत्य॥इषुधिःसंकाःपृतनाश्चसर्वाःपृष्ठेनिनद्धोजयतिप्रसूतः॥पृष्ठे॥उरुभ्यां
तेश्रष्ठीवद्भ्यांपार्ष्णिभ्यांप्रपदाभ्यां॥यक्ष्मंश्रोणिभ्यांभासदाद्रूंससोवि०॥उर्वोः॥
मेहनाद्वनंकरणाल्लोमभ्यस्तेनखेभ्यः॥यक्ष्मंसर्वस्मादात्मनस्तमिदंवि०॥जा
न्वोः॥एतावानस्येतिपादयोः॥यस्यविश्वानिहस्तयोःपंचक्षितीनांवसु॥स्पाश्रा
पस्वयोश्रस्मभुग्दिव्येवाश्रानिजीहि॥हस्तयोः॥श्रंगादंगाल्लोम्नोलोम्नोजातंपर्वि

राम
१०

उद्धृतासिवराहेणकृष्णेनशतबाहुना॥मृत्तिकेहनमेपापंयन्मयादुष्कृतंकृतं॥मृत्तिकेब्रह्मदत्तासिकाश्यपेनाभिमंत्रिता॥मृत्तिकेदेहिमेपुष्टिंत्वयिसर्वंप्र
तिष्ठितं॥मृत्तिकेप्रतिष्ठितेसर्वंतन्मेनिर्णुदमृत्तिके॥त्वयाहतेनपापेनगच्छामिपरमांगतिं॥
णिपर्वणि॥यक्ष्मंसर्वस्मादात्मनस्तमिदंवि०॥पुरुषसूक्तेनसर्वांगे॥अश्वक्रांतेरथ
क्रांतेविष्णुक्रांतेवसुंधरे॥शिरसाधारयिष्यामिरक्षस्वमांपदेपदे॥इतिसतिलदू
र्वामिदंशिरसिनिधाय॥म्लेछानंप्रक्ष्याल्य॥तीर्थंप्रार्थयेत॥हिरण्यशृंगंवरुणं
प्रपद्येतीर्थंमेदेहियाचितः॥यन्मयाभुक्तमसाधूनांपापेभ्यश्चप्रतिग्रहः॥यन्
मेमनसावाचाकर्मणादुष्कृतंकृतं॥तन्नइंद्रोवरुणोबृहस्पतिःसविताचपुनंतुपु
नःपुनः॥नमोग्नयेप्सुमतेनमइंद्रायनमोवरुणायनमोवारुण्येनमोद्भ्यः॥यद
पांक्रूरंयदमेध्यंयदशांतंतदपगच्छतात्॥अत्याशनादतीपानाद्यच्चउग्रात्प्रतिग्र
हात्॥तन्नोवरुणोराजापाणिनाह्यवमर्शतु॥सोहमपापोविरजोनिर्मुक्तोमुक्तकि
ल्बिषः॥नाकस्यपृष्ठमारुह्यगच्छेद्ब्रह्मसलोकतां॥अवतेहेडौउदुत्तममितिद्व

उ० क०
११

योवरुणंप्रार्थयेत्॥ गंगागंगेतिपौराणिकेश्चतीर्थंप्रार्थयेत्॥ याःप्रवतोनिवत
इतिमंत्रेणतीर्थाभिमर्शने॥ प्रवाहाभिमुखस्त्रिर्निमज्य॥ आपोहिष्ठेतितिसृभिः॥
समुद्रज्येष्ठाइतिचतसृभिः॥ त्रिभिश्चद्देवेत्यादिपावमानीभिश्चमार्जयित्वा॥ इमं
मेगंगइत्यृचमालोड्य॥ ऋतंचेत्यघमर्षणंकृत्वा॥ प्रवाहाभिमुखस्त्रिर्मज्जित्वा
स्नानांगतर्पणंकृत्वा॥ ब्रह्मादयोदेवाः॥ तान्देवांस्तर्पयामि॥ भूर्देवांस्तर्पयामि॥ भु
वर्देवांस्तर्पयामि॥ स्वर्देवांस्तर्पयामि॥ भूर्भुवःस्वर्देवांस्तर्पयामि॥ ततोनिवीती॥
कृष्णद्वैपायनादयोयेऋषयः॥ तानृषींस्तर्पयामि॥ भूरृषींस्तर्पयामि॥ भुवऋ
षींस्त०॥ स्वऋषींस्त०॥ भूर्भुवःस्वऋषींस्त०॥ प्राचीनावीती॥ सोमःपितृमान्यमों
गिरस्वानग्निःकव्यवाहनादयोयेपितरः॥ तान्पितॄंस्त०॥ भूःपितॄंस्त०॥ भुवःपि

राम
११

तॄंस्त०॥ स्वःपितॄंस्त०॥ भूर्भुवःस्वःपितॄंस्त०॥ अग्निदग्धाश्चयेजीवायेप्यदग्
धाःकुलेमम॥ भूमौदत्तेनतोयेनतृप्तायांतुपरांगतिं॥ इतिजलांजलिंतटेनि
क्षिप्य॥ यन्मयादूषितंतोयंशारीरमलसंभवान्॥ तद्दोषपरिहारार्थंयक्ष्मा
णंतर्पयाम्यहं॥ सप्तदर्भकूर्चेषुसर्वैःसहकश्यपादिसप्तर्षीनावाह्य॥ आ
चार्यःआचम्यप्राणानायम्योत्सर्जनांगंऋषीन्पूजयिष्ये॥ चतुरंगुलकु
शामग्रंविहायप्रदक्षिणान्ग्रंथीन्कृत्वातान्पीठादाववस्थाप्य॥ कश्यपोत्रि
र्भरद्वाजोविश्वामित्रोथगोतमः॥ जमदग्निर्वसिष्ठश्चसाध्वीचैवाप्यरुंध
ती॥ अरुंधतीसहितानावाहयामि॥ तदस्त०गृहावैप्रतिष्ठा०॥ देवाएतस्या
मितिमंत्रेणषोडशोपचारैरभ्यर्च्य॥ मंत्रहीनंक्रियाहीनमितिसंप्रार्थ्य॥

उ॰पा॰
१२

कश्यपंतर्पयामि॰ अत्रिं॰ भरद्वाजं॰ विश्वामित्रं॰ गौतमं॰ जमदग्निं॰ वसिष्ठं॰ अरुंधतीं॰
ततः सावित्र्यादींस्तर्पयेत्॥ तद्यथा॥ सावित्रीं तर्पयामि॥१॥ ब्रह्माणं तर्पयामि॥२॥ श्रद्धां
तं॰॥ मेधां तं॰॥ प्रज्ञां तं॰॥ धारणां॰॥ सदसस्पतिं तं॰॥ अनुमतिं तं॰॥ छंदांस्यृषींस्तं॰॥
अग्निं तं॰॥ अग्नये स्वाहा सूर्यं तं॰॥ अग्निं तर्पयामि॥ क्रतुं तर्प॰॥ अग्निं तं॰॥ मित्रावरुणौ
तर्पयेतां॥ अग्निं तं॰॥ अपस्तं॰॥ अग्निं तं॰॥ मरुतं तं॰॥ अग्निं तं॰॥ विश्वान्देवांस्तं॰॥
अग्निं तं॰॥ इंद्राग्नीसोमौ तर्प्यतां॥ इंद्रं तं॰॥ अग्ना मरुतस्तं॰॥ पवमानसोमं तं॰॥ सोमं तं॰॥
अग्निं तं॰॥ संज्ञानं तं॰॥२०॥ अग्न्यादिदेवर्षिपितृतर्पणं ब्रह्मयज्ञवत्कृत्वा स्वपित्रादीं
श्च तर्पयेत्॥ प्रजापतिस्तृप्यतु॥ ब्रह्मा तृप्यतु॥ वेदास्तृप्यंतु॥ देवास्तृप्यंतु॥ ऋषयस्तृ
प्यंतु॥ सर्वाणि छंदांसि तृप्यंतु॥ ॐकारस्तृप्यतु॥ वषट्कारस्तृप्यतु॥ व्याहृतयस्तृ
प्यंतु॥ सावित्री तृप्यतु॥ यज्ञास्तृप्यंतु॥ द्यावापृथिवी तृप्येतां॥ अंतरिक्षं तृप्यतु॥ अ

राम
१२

होरात्राणि तृप्यंतु॥ संख्यास्तृप्यंतु॥ सिद्धास्तृप्यंतु॥ समुद्रास्तृप्यंतु॥ नद्यस्तृप्यंतु॥ गिरयस्तृ
प्यंतु॥ क्षेत्रौषधिवनस्पतिगंधर्वाप्सरसस्तृप्यंतु॥ नागास्तृप्यंतु॥ वयांसि तृप्यंतु॥ गावस्तृ
प्यंतु॥ साध्यास्तृप्यंतु॥ विप्रास्तृप्यंतु॥ यक्षास्तृप्यंतु॥ रक्षांसि तृप्यंतु॥ भूतानि तृप्यंतु॥ एव
मंतानि तृप्यंतु॥ अथ ऋषयः॥ ततो नीवीती॥ शतर्चिनस्तृप्यंतु॥ माध्यमास्तृप्यंतु॥ गृत्सम
दस्तृप्यतु॥ विश्वामित्रस्तृप्यंतु॥ वामदेवस्तृप्यतु॥ अत्रिस्तृप्यतु॥ भरद्वाजस्तृप्यतु॥ व
सिष्ठस्तृप्यतु॥ प्रगाथास्तृप्यंतु॥ पावमान्यस्तृप्यंतु॥ क्षुद्रसूक्तास्तृप्यंतु॥ महासूक्तास्तृप्यं
तु॥ प्राचीनावीती॥ सुमंतुजैमिनिवैशंपायनपैलसूत्रभाष्यभारतमहाभारतधर्माचार्या
स्तृप्यंतु॥ जानंतिबाहविगार्ग्यगौतमशाकल्यबाभ्रव्यमांडव्यमांडूकेयास्तृप्यंतु॥ गार्गीवाच
क्नवी तृप्यतु॥ वडवा प्रातीथेयी तृप्यतु॥ सुलभा मैत्रेयी तृप्यतु॥ कहोळं तर्पयामि॥ कौषितकं
तं

उ॰पा॰
१३

त॰॥ महाकौषितकिं त॰॥ पैंग्यं त॰॥ महापैंग्यं त॰॥ सुयज्ञं त॰॥ सांख्यायनं त॰॥ ऐतरेयं त॰॥ महैतरेयं त॰॥ शाकलं त॰॥ बाष्कलं त॰॥ सुजातवक्त्रं त॰॥ औदवाहिं त॰॥ महौदवाहिं त॰॥ सौजामिं त॰॥ शौनकं त॰॥ आश्वलायनं त॰॥ ये चान्ये आचार्यास्ते सर्वे तृप्यंतु॥ ॥ स्वपित्रादीश्च तर्पयित्वा॥ सव्येनापसव्येन वा यमादींस्तर्पयेत्॥ यमं तर्प॰॥ धर्मराजं त॰॥ मृत्युं त॰॥ अंतकं त॰॥ वैवस्वतं त॰॥ कालं त॰॥ नीलं त॰॥ परमेष्ठिनं त॰॥ औदुंबरं त॰॥ दध्नं त॰॥ सर्वभूतक्षयं त॰॥ वृकोदरं त॰॥ चित्रं त॰॥ चित्रगुप्तं त॰॥ यमो निहंता पितृधर्मराजो वैवस्वतो दंडधरश्च कालः॥ कालभूताधिपो दत्तकृतानुसारी कृतांतमेतद्दशभिर्जपंति॥ इति दशवारं जपेत्॥ ततः सांस्पर्शौ॥ आनोभद्राः॥ शंनइंद्राग्नी॰॥ समुद्रज्येष्ठ॰॥ तिस्रोवाचः॰॥ पर्जन्याय॰॥ अच्छावद॰॥ बळित्था॰ प्रदेवत्रा॰ बृहस्पते प्रति मे॰॥ ऋषयो वैश्वदेवं हूयं॥ ततः वेदप्रीत्यर्थं ब्राह्मणान्भोजयेत्॥ उत्स

राम
१३

र्जन उपाकर्मणि तेवा ऋषीनुद्वास्य॥ अथ ऋषीणां पुष्पांजलिमंत्राः॥ ॐ ऋषे मंत्रकृतां स्तोमैः॰ ऋक॥ अत्रिर्यद्वामवरोहन्नृ॰ एवानस्त्रधः॰ भरद्वाजाउत तद्दिंद्रनूनं॥ एवातेवयमिंद्र॰ विश्वामित्राउत तदिंद्रनूनं॥ ॥ अग्निर्गोतमा गिरा॰ प्रसूतो भक्षमकरं च॰ गणानां जमदग्निना॰ उतासि मैत्रावरुणो वसिष्ठ॰ अत्रेर्यथानुसूयास्यात॰ इति पुष्पांजलिमंत्राः॥ देवा एतस्येति मंत्रेण ऋषीन्जले उद्वास्य॥ विश्वेत्तातेसवनेषिति वा॥ ॥ इत्युत्सर्जनं॥ ॥ अथोपाकर्म॥ ॥ ततः आचार्यः सुस्नातः प्राणानायम्य देशकालौ स्मृत्वा ममैतेषां ब्राह्मणानां मन्त्र...ध्येष्यमाणानां छंदसां यातयामतानिरासेनाध्ययनद्वारा श्रीपरमेश्वरप्रीत्यर्थं उपाकर्माख्यं करिष्ये इति संकल्प्याग्निं प्रतिष्ठाप्य तेन्वादध्यात्॥ समिद्वयमादाय उपाकर्महोमे देवतापरिग्रहार्थमन्वाधानं करिष्ये च क्षुषी आ मंभुनामौ

उ०क०
१४

ज्येनेत्यंतमुक्त्वा॥ सावित्रीमित्यादिछंदांस्यृषीनित्यंताः प्रधानदेवताआज्येन॥ अग्निमि
त्यादिसंज्ञानमित्यंताः प्रधानदेवता दधिसक्तुद्रव्येण॥ शेषेण स्विष्टकृतमिध्मसन्नह
नेन रुद्रं परमात्मानं यज्ञोपवीतेन॥ अयास मग्निमित्यादिसद्योयक्ष्यइत्यंतमुक्त्वा॥ परि
समूहनाद्याज्येदर्शाग्न्ह्य प्रक्षेपांतं कृत्वा दधिसक्तुपात्रमग्निसमीपे चरुस्थालीस्था
नस्थापित पात्रेनिधायाज्येन सहत्रिः पर्यग्नि कृत्वाऽऽज्यभागांतं कृत्वा॥ सावित्र्यादिस्रु
वेण नवप्रधानाहुतीर्हुत्वा॥ स्रुच्यवदान धर्मेण दधिसक्तुना दायाग्निमीळइत्यादि
मंत्रैर्हुत्वा॥ स्विष्टकृदाज्य प्रहरणं कृत्वा॥ सर्वेषां दधिसक्तून्प्राश्नीयुः॥ दधिक्राव्णो वामदे
वो दधिक्रा वानुष्टुप्॥ दधिसक्तुप्राशने विनियोगः॥ ॐ दधिक्राव्णो अकारिषं०रिषत॥ द्विरा
चम्य ततो मार्जनं॥ परिस्तरणानाम धस्तादंजलिं निधायान्येनापः सेचयित्वा मार्ज

राम
१४

क्रार

यज्ञोपवीतहोमः॥ यज्ञोपवीतमित्यस्य परब्रह्म परमात्मा त्रिष्टुप्॥ यज्ञोपवीतहोमे वि०॥ ॐ
यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात्॥ आयुष्यमग्र्यं प्रतिमुंच शुभ्रं यज्ञो
पवीतं बलमस्तु तेजः स्वाहा॥ परमात्मन इदं॥ दत्वा धारणं च॥ अध्यादिस्मरणांते सर्वेषामु
पाकरणे वि०॥ सावित्री पछोर्द्धर्चशः सर्वामुक्त्वा अग्निमीळइत्यादि परिधानीया वाच
नांतं प्राग्वत्कृत्वा॥ सर्वे उष्णा कृतावेवेदाइत्यंजलिस्थान्कुशान्दक्षिणकटौ निवेश्याप उप
स्पृश्य प्रायश्चित्तादिहोमशेषं समाप्य॥ वेदप्रीत्यर्थं ब्राह्मणान्भोजयेत॥ कर्मद्वयमिदं
केचिल्लौकिकाग्नौ प्रयुंजते॥ इत्युत्सर्जनोपाकर्मप्रयोगः॥ ॥ अथ नूतनब्रह्मचारिणो
पाकरणे विशेषः॥ अस्य ब्रह्मचारिणो वेदग्रहणादि सिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं
उपाकर्माख्यं कर्म करिष्य इति संकल्प्य॥ तदंगभूतं गणपतिपूजनं स्वस्तिवाचनं मातृका

उ॰पा॰
१५

पूजनं नांदीश्राद्धानि कृत्वा॥ यज्ञोपवीतधारणं तेनवानि कटिसूत्र कौपीन वस्त्र मेखला
दंडाजिनानि धारयेत्॥ पुराणानि विसृज्य॥ इति नूतनब्रह्मचारिणविशेषः॥ ॥संवत्
१८७४ शाके १७ ३९ सर्वधारीनाम संवत्सरे उत्तरायणे ग्रीष्म ऋतौ आषाढ मा
से शुक्लपक्षे ततीयां सौम्यवासरे तद्दिने समाप्तं॥ ॥ ॥श्रीराम॥ ॥छ॥ ॥
इदं पुस्तकं बाळंभट्ट रामडोह करस्य॥ ॥श्रीलक्ष्मीनारायणप्रसन्नोस्तु॥
यवं ई यं इ रु कादिति दे पो र्गम देपो मेखला त्रिवृद्रूपा॥ मेखलाबं
ध ने विनि॥ स्वशक्ती न ई प्रस्य स्य स्या त्रे यो विधे देवो सिद्रूपा॥
दं ३ दा ने वि॥ [illegible] तो व दो इ ती म इ ण मंत्र॥ अ दं तां॥
कौपीनं धारयेत् र युवं प ज्ञानी यौ च श्यो दीर्घं त मामि त्राव णो त्रिवृद्रूपा॥
वासो धारणे विनीयोगः॥ मि त्रस्य च क्षुरि व्य स्यवा म देवो [illegible] नं त्रिवृद्रूप
अजिन धारणे वि॥

राम
१५